Totalbhakti.com

# सूर्याष्टकम्

श्रीगणेशाय नमः ॥ सांब उवाच ॥

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर । दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥१॥

सप्ताश्वरथमारुढ़ प्रचण्डं कश्यपात्मजम् । श्वेतपद्मधरं देवं तं सुर्यं प्रणमाम्यहम् ॥२॥

लोहितं रथमारुढं सर्वलोकपितामहम् । महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥

त्रैगुण्यं च महाशुरं ब्रह्माविष्णुमहेश्वरम् । महापापहरं देव तं सूर्यं प्रणमाम्यहम् ॥४॥

बृंहितं तेजः पुञ्जं च वायुरामाकाशमेव च । प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥

बंधूकपुष्पसंकाशं हारकुण्डलभूषितम् । एकचक्रधरं देवं तं सुर्यं प्रणमाम्यहम् ॥६॥

तं सुर्यं जगत्कर्तारं महातेजःप्रदीपनम् । महापापहरं देवं तं सुर्यं प्रणमाम्यहम् ॥७॥

तं सुर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् । महापापहरं देवं तं सुर्यं प्रणमाम्यहम् ॥८॥

इति श्रीशिवप्रोक्तं सुर्याष्टकस्तोत्रं सम्पूर्णम् ।

www.totalbhakti.com